श्री सूर्य स्तुतिः (मनु कृतं)

श्री सूर्य स्तुतिः (मनु कृतं)

मनुरुवाच |
नमो नमो वरेण्याय वरदायाऽंशुमालिने |
ज्योतिर्मय नमस्तुभ्यमनंतायाजिताय ते || 1 ||

त्रिलोकचक्षुषे तुभ्यं त्रिगुणायामृताय च |
नमो धर्माय हंसाय जगज्जननहेतवे || 2 ||

नरनारीशररीराय नमो मीढुष्टमाय ते |
प्रज्ञानायाखिलेशाय सप्ताश्वाय त्रिमूर्तये || 3 ||

नमो व्याहृतिरूपाय त्रिलक्षायाऽऽशुगामिने |
हर्यश्वाय नमस्तुभ्यं नमो हरितवाहवे || 4 ||

एकलक्षविलक्षाय बहुलक्षाय दंडिने |
एकसंस्थद्विसंस्थाय बहुसंस्थाय ते नमः || 5 ||

शक्तित्रयाय शुक्लाय रवये परमेष्ठिने |
त्वं शिवस्त्वं हरिर्देव त्वं ब्रह्मा त्वं दिवस्पतिः || 6 ||

त्वमोंकारो वषट्कारः स्वधा स्वाहा त्वमेव हि |
त्वामृते परमात्मानं न तत्पश्यामि दैवतं || 7 ||

इति श्रीसौरपुराणे प्रथमोऽध्याये मनुकृत श्री सूर्य स्तुतिः |